जातस्य जातकर्म्मादि क्रियाकाण्डमशेषतः ।
पुत्त्रस्य कुर्व्वीत पिता श्राद्धञ्चाभ्युदयात्मकम् ॥”
इति विष्णुपुराणे ३ अंशे ९ अध्यायः ॥
(यथा, मार्कण्डेये । ३० । १ ।
“नित्यं नैमित्तिकञ्चैव नित्यनैमित्तिकन्तथा ।
गृहस्थस्य तु यत् कर्म्म तन्निशामय पुत्त्रक ! ॥”)
नैमित्तिकदानं, क्ली, (निमित्तमाश्रित्य दीयते इति दा + भावे ल्युट् । अस्य निरुक्तिर्यथा ।) निमित्तनिश्चयवदधिकारिकर्त्तृकदानम् । यथा,—
“यत्तु पापोपशान्त्यर्थं दीयते विदुषां करे ।
नैमित्तिकं तदुद्दिष्टं दानं सद्भिरनुष्ठितम् ॥”
इति गरुड़पुराणम् ॥
नैमित्तिकलयः, पुं, (नैमित्तिकः ब्रह्मणो दिवावसाननिमित्तवशात् यो लयः ।) प्रलयविशेषः । यथा,—
“चतुर्युगसहस्रान्ते ब्राह्मो नैमित्तिको लयः ।
अनावृष्टिश्च कल्पान्ते जायते शतवार्षिकी ॥
उत्तिष्ठन्ति तदा रौद्रा दिवि सप्त दिवाकराः ।
ते तु पीत्वा जलं सर्व्वं शोषयन्ति जगत्त्रयम् ॥
भूर्भुवःस्वर्म्महर्लोकसंस्था यान्ति जनं जनाः ।
रुद्रो भूत्वा त्वसौ विष्णुः पातालानि दहत्यधः ॥
विष्णुर्देहैस्त्रिलोकञ्च सुखान्मेघान् सृजत्यलम् ।
वर्षन्ति च वर्षशतं नानावर्णा महाघनाः ॥
विष्णुस्तज्जः शतं वाति वर्षाणां वायुरूर्ज्जितः ॥
विष्णुरेकार्णवे पीत्वा सर्व्वं ब्रह्मस्वरूपधृक् ।
शेतेऽनन्तासने विष्णुर्नष्टे स्थावरजङ्गमे ।
सुप्त्वा युगसहस्रं स जगद्भूयोऽसृजद्धरिः ॥”
इति गरुड़पुराणम् ॥
(तथा च भागवते । ८ । २४ । ७ ।
“आसीदतीतकल्पान्ते ब्राह्मो नैमित्तिको
लयः ॥”)
नैमित्तिकस्नानं, क्ली, (नैमित्तिकञ्च तत् स्नानञ्चेति । निमित्तवशात् निमित्तमाश्रित्य विधेयं स्नानमित्यर्थे ।) निमित्तनिश्चयवदधिकारिकर्त्तृकस्नानम् । यथा,—
“चाण्डालशवयूपादि स्पृष्ट्वा स्नातां रजस्वलाम् ।
स्नानार्हस्तु यदा स्नाति स्नानं नैमित्तिकं हि
तत् ॥”
इति गरुड़पुराणम् ॥
नैमिषारण्यं, क्ली, (निमिषान्तरमात्रेण निहतं आसुरं बलं यत्र तत्तस्तत् नैमिषं अरण्यमिति ।) अरण्यविशेषः । तस्योत्पत्तिर्यथा,—
“तेन चक्रेण तत्सैन्यमासुरं दौर्व्वयं जवात् ।
निमिषान्तरमात्रेण भस्मवद्बहुधा कृतम् ॥
एवं कृत्वा ततो देवो मुनिं गौरमुखं तदा ।
उवाच निमिषेणेदं निहतं दानवं बलम् ॥
अरण्येऽस्मिंस्ततस्त्वेतन्नैमिषारण्यसंज्ञकम् ।
भविष्यति यथार्थं वै ब्राह्मणानां विशेषतः ॥”
इति वराहपुराणे गौरमुखं प्रति भगवद्वाक्यम् ॥ अपि च ।
“देशं वः संप्रवक्ष्यामि यस्मिन्देशे चरिष्यथ ।
उक्त्वा मनोमयं चक्रं स सृष्ट्वा तानुवाच ह ॥

क्षिप्रमेतन्मया चक्रमनुव्रजत माचिरम् ।
यत्रास्य नेमिः शीर्य्येत स देशः पुरुषर्षभ ॥
ततो मुमोच तच्चक्रं ते च तत् समनुव्रजन् ।
तस्य वै व्रजतः क्षिप्रं यत्र नेमिरशीर्य्यत ॥
नैमिषं तत् स्मृतं नाम्ना पुण्यं सर्व्वत्र पूजितम् ।
सिद्धचारणसङ्कीर्णं यक्षगन्धर्व्वसेवितम् ॥
स्थानं भगवतः शम्भोरेतन्नैमिषमुत्तमम् ।
अत्र देवाः सगन्धर्व्वाः सयक्षोरगराक्षसाः ।
तपस्तप्त्वा पुरा देवा लेभिरे प्रचुरान् भगान् ॥”
इति कौर्म्मे ४० अध्याये षट्कुलीयान् प्रति ब्रह्मवाक्यम् ॥ (क्वचित्तु चालयमानोऽपि पाठो दृश्यते तत्र तु ब्रह्मणा विसृष्टस्य मनोमयचक्रस्य नेमिः शीर्य्यते यत्रेति व्युत्पत्त्या नैमिशं नैमिशमेव नैमिषं तदाख्यमरण्यमिति बोध्यम् । तथा च वायवीये ।
“एतन्मनोमयं चक्रं मया सृष्टं विसृज्यते ।
यत्रास्य शीर्य्यते नेमिः स देशः तपसः शुभः ॥
इत्युक्त्वा सूर्य्यसङ्काशं चक्रं सृष्ट्वा मनोमयम् ।
प्रणिपत्य महादेवं विससर्ज्ज पितामहः ॥
तेऽपि हृष्टतमा विप्राः प्रणम्य जगतां प्रभुम् ।
प्रययुस्तस्य चक्रस्य यत्र नेमिर्व्यशीर्य्यत ॥
तद्वनं तेन विख्यातं नैमिशं मुनिपूजितम् ॥”
तथा च देवीभागवते । १ । २ । २८-३२ ।
“कलिकालविभीताः स्मो नैमिषारण्यवासिनः ।
ब्रह्मणात्र समादिष्टाश्चक्रं दत्त्वा मनोमयम् ॥
कथितं तेन नः सर्व्वान् गच्छन्त्वेतस्य पृष्ठतः ।
नेमिः संशीर्य्यते यत्र स देशः पावनः स्मृतः ॥
कलेस्तत्र प्रवेशो न कदाचित् संभविष्यति ।
तावत् तिष्ठन्तु तत्रैव यावत् सत्ययुगं पुनः ॥
तच्छ्रुत्वा वचनं तस्य गृहीत्वा तत्कथानकम् ।
चालयन्निर्गतस्तूर्णं सर्व्वदेशदिदृक्षया ॥
प्रेक्षतश्चालयंश्चक्रं नेमिः शीर्णोऽत्र पश्यतः ।
तेनेदं नैमिषं प्रोक्तं क्षेत्रं परमपावनम् ॥”)
नैमेयः, पुं, (नि + मेङ् प्रणिदाने + अचो यत् इति यत् । ततः स्वार्थे प्रज्ञादाण् । मिधातुना निष्पन्नमिति केचित् ।) परिवर्त्तः । विनिमयः । इत्यमरः । २ । ९ । ८० ॥
नैयग्रोधं, क्ली, (न्यग्रोधस्य विकारः ततः प्लक्षादिभ्योऽण् ।” ४ । ३ । १६४ । इत्यण् । तस्य विधानसामर्थ्यात् फले न लुक् । “न्यग्रोधस्य च केवलस्य ।” ७ । ३ । ५ । इति न ऐजागमश्च ।) न्यग्रोधफलम् । इत्यमरः । २ । ४ । १८ ॥ न्यग्रोधजातचर्म्मादि । इति वोपदेवरामतर्कवागीशौ ॥
नैयङ्कवं, त्रि, (न्यङ्कोर्विकार इति । “प्राणिरजतादिभ्योऽञ् ।” ४ । ३ । १५४ । इति विकारेऽञ् ।) न्यङ्कुमृगजातवस्त्रचर्म्मादि । इति वोपदेवरामतर्कवागीशौ ॥
नैयत्यं, क्ली, (नियतस्येदं इति । नियत + ष्यञ् ।) नियतत्वम् । नियतस्य भाव इत्यर्थे ष्यप्रत्ययनिष्पन्नम् ॥
नैयायिकः, पुं, (न्यायं गोतमादिप्रणीतं तर्कशास्त्रविशेषं अधीते वेत्ति वा । न्याय + “क्रतूक्थादि-

सूत्रान्ताट्ठक् ।” ४।२।६०। इति ठक् ।) न्यायवेत्ता । न्यायाध्येता । तत्पर्य्यायः । अक्षपादः २ तार्किकः ३ आर्क्षिकः ४ । इति जटाधरः ॥
(यथा, महाभारते । १ । २ । १६६ ।
“नैयायिकानां मुख्येन वरुणस्यात्मजेन च ।
पराजितो यत्र बन्दी विवादेन महात्मना ॥”)
नैरन्तर्य्यं, क्ली, (निरन्तरस्य भाव इति । निरन्तर + ष्यञ् ।) निरन्तरत्वम् । निरन्तरस्य भाव इत्यर्थे ष्यप्रत्ययनिष्पन्नम् ॥ (यथा मनौ । ९ । २७१ श्लोकस्य टीकायां कुल्लूकभट्टः ।
“ये च ददति तानपि नैरन्तर्य्यादपराधगोचरा
येनया घातयेत् ॥”)
नैराश्यं, क्ली, (निराशस्य निरभिलाषस्य भावः इति । निराश + ष्यञ् ।) आशाया अभावः । यथा,—
“आशा हि परमं दुःखं नैराश्यं परमं सुखम् ।
आशया पिङ्गला वेश्या त्यक्त्वा जन्म निरर्थकम् ॥”
इति ब्रह्मवैवर्त्तीयश्रीकृष्णजन्मखण्डे ६७ अः ।
(यथा, महाभारते । १ । २२५ । १ ।
“स तु नैराश्यमापन्नः सदा ग्लानिसमन्वितः ।
पितामहमुपागच्छत् संक्रुद्धो हव्यवाहनः ॥”)
नैरुक्तं, त्रि, (निरुक्तस्येदं निरुक्तौ भवं वा । “ऋगयनादिभ्यः ।” ४ । ३ । ७३ । इति अण् ।) निरुक्तसम्बन्धि । यथा, “वृद्धेत्यत्र वृद्धिरिति यस्य ठः न ढः इति नैरुक्तम् ।” इति रामतर्कवागीशः ॥
(निरुक्तं शास्त्रविशेषं वेत्ति अधीते वा । निरुक्तवेत्ता । यथा, मनुः । १२ । १११ ।
“त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्म्मपाठकः ।”)
नैरृतः, पुं, (निरृतेरपत्यम् । इत्यण् ।) राक्षसः ।
(यथा, महाभारते । ९ । ६६ । ५५ ।
“तस्यापि निरृतिर्भार्य्या नैरृता येन
राक्षसाः ॥”)
पश्चिमदक्षिणकोणाधिपतिः । इत्यमरः । १ । १ । ६३ , १ । ३ । २ ॥ ज्योतिषमते तत्कोणाधिपती राहुः । यथा,—
“सूर्य्यः शुक्रः क्षमापुत्त्रः सैंहिकेयः शनिः शशी ।
सौम्यस्त्रिदशमन्त्री च प्रागादिदिगधीश्वराः ॥”
इति ज्योतिस्तत्त्वम् ॥
नैरृती, स्त्री, (निरृतेरियमिति । निरृतिरधिष्ठाता यस्या वा । अण् ङीप् च ।) अवाचीप्रतीच्योर्म्मध्या दिक् । नैरृतकोणः । इति राजनिर्घण्टः जटाधरश्च ॥ (यथा, मनुः । ११ । १०५ ।
“खट्वाङ्गी चीरवासा वा श्मश्रुलो निर्ज्जने वने ।
नैरृतीं दिशमातिष्ठेदानिपातादजिह्मगः ॥”)
नैर्गुण्यं, क्ली, (निर्गुणस्य भावः कर्म्म वा । निर्गुण + ष्यञ् ।) निर्गुणत्वम् । यथा, श्रीभागवते । २ । १ । ९ ।
“परिनिष्ठितोऽपि नैर्गुण्ये उत्तमश्लोकलीलया ।
गृहीतचेता राजर्षे आख्यानं यदधीतवान् ॥”
(यथा, महाभारते । २ । १६ । १५ ।